# chandrachUDAlAShTakam

# ચન્દ્રચૂડાલાષ્ટકમ્

## Document Information

Text title : chandrachUDAlAShTakam

File name : chandrachUDAlAShTakam.itx

Category : aShTaka, shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : November 7, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# ચન્દ્રચૂડાલાષ્ટકમ્

શ્રીગણેશાય નમઃ ॥

યમનિયમાદ્યઙ્ગયુતૈર્યોગૈર્યત્પાદપઙ્કજં દ્રષ્ટુમ્ ।
પ્રયતન્તે મુનિવર્યાસ્તમહં પ્રણમામિ ચન્દ્રચૂડાલમ્ ॥ ૧॥

યમગર્વભઞ્જનચણં નમતાં સર્વેષ્ટદાનધૌરેયમ્ ।
શમદમસાધનસમ્પલ્લભ્યં ગ્રણમામિ, ચન્દ્રચૂડાલમ્ ॥ ૨॥

યં દ્રોણબિલ્વમુખ્યૈઃ પૂજયતાં દ્વારિ મત્તમાતઙ્ગાઃ ।
કણ્ઠે લસન્તિ વિદ્યાસ્તમહં પ્રણમામિ ચન્દ્રચૂડાલમ્ ॥ ૩॥

નલિનભવપદ્મનેત્રપ્રમુખામરસેવ્યમાનપદપદ્મમ્ ।
નતજનવિદ્યાદાનપ્રવણં પ્રણમામિ ચન્દ્રચૂડાલમ્ ॥ ૪॥

નુતિભિર્દેવવરાણાં મુખરીકૃતમન્દિરદ્વારમ્ ।
સ્તુતમદિમવાક્તતિભિઃ સતતં પ્રણમામિ ચન્દ્રચૂડાલમ્ ॥ ૫॥

જન્તોસ્તવ પાદપૂજનકરણાત્કરપદ્મગાઃ પુમર્થાઃ સ્યુઃ ।
મુરહરપૂજિતપાદં તમહં પ્રણમામિ ચન્દ્રચૂડાલમ્ ॥ ૬॥

ચેતસિ ચિન્તયતાં યત્પદપદ્મં સત્વરં વક્ત્રાત્ ।
નિઃસરતિ વાક્સુધામા તમહં પ્રણમામિ ચન્દ્રચૂડાલમ્ ॥ ૭॥

નમ્રાજ્ઞાનતમસ્તતિદૂરીકરણાય નેત્રલક્ષ્માદ્યઃ ।
ધત્તેઽગ્નિચદ્રસૂર્યાસ્તમહં પ્રણમામિ ચન્દ્રચૂડાલમ્ ॥ ૮॥

અષ્ટકમેતત્પઠતાં સ્પષ્ટતરં કષ્ટનાશનં પુંસામ્ ।
અષ્ટ દદાતિ હિ સિદ્ધિરિષ્ટસમષ્ટીશ્ચ ચન્દ્રચૂડાલઃ ॥ ૯॥

ઇતિ શ ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીચદ્રચૂડાલાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*chandrachUDAlAShTakam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*